कक्षा – 6
पाठ – 6
समुद्रतटः

प्र.2 अधोलिखितानां प्रश्नानाम् उत्तरं लिखत –

क जनाः काभिः जलविहारं कुर्वन्ति?
उ0. जनाः नौकाभिः जलविहारं कुर्वन्ति।

ख भारतस्य दीर्घतमः समुद्रतटः कः?
उ0 भारतस्य दीर्घतमः समुद्रतटः चैन्नईनगरस्य मेरीनातटः अस्ति।

ग जनाः कुत्र स्वैरं विहरन्ति?
उ0. जनाः मुम्बई नगरस्य जुहूतटे स्वैरं विहरन्ति।

घ बालकाः बालुकाभिः किं रचयन्ति?
उ0. बालकाः बालुकाभिः बालुकागृहं रचयन्ति।

ङ़ कोच्चितटः केभ्यः ज्ञायते?
उ0. कोच्चितटः नारिकेलफलेभ्यः ज्ञायते।

प्र.3 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –

1 कन्याकुमारीतटे त्रयाणां सागराणां **सङ्गमः** भवति।
2 भारतदेशः **प्रायद्वीपः** इति कथ्यते।
3 जनाः समुद्रतटं **पर्यटनाय** आगच्छन्ति।
4 बालेभ्यः **क्रीडा** रोचते।
5 भारतस्य पूर्वदिशायां **बङ्गोपसागरः** अस्ति।

प्र.4 यथायोग्यं योजयत –

| | |
|---|---|
| समुद्रतटः | पर्यटनाय |
| क्रीडनकम् | खेलनाय |
| दुग्धम् | पोषणाय |
| दीपकः | प्रकाशाय |
| विद्या | ज्ञानाय |

प्र.5 तृतीयाविभक्तिप्रयोगेण रिक्तस्थानानि पूरयत –

क बालकाः **बालिकाभिः** सह पठन्ति।
ख तडागः **कमलैः** विभाति।
ग अहमपि **कन्दुकेन** खेलामि।
घ अश्वाः **अश्वैः** सह धावन्ति।
ङ़ मृगाः **मृगैः** सह चरन्ति।

प्र.6 अधोलिखितं वृत्तचित्रं पश्यत। उदाहरणानुसारेण कोष्ठकगतैः शब्दैः उचितवाक्यानि रयचत –

1 रहीमः मित्रेण सह क्रीडति।
2 रहीमः द्विचक्रिकया आपणं गच्छति।
3 रहीमः कलमेन पत्रं लिखति।

Edit with WPS Office

4 रहीमः हस्तेन कन्दुकं क्षिपति।
5 रहीमः नौकाया जलविहारं करोति।
6 रहीमः चषकेन जंल पिबति।
7 रहीमः तूलिकया चित्रं रचयति।
8 रहीमः वायुयानेन ह्यः आगच्छत्।

प्र.7 कोष्ठकात् उचितपदप्रयोगेण रिक्तस्थानानि पूरयत –
1 धनिकः **निर्धनाय** धनं ददाति।
2 बालः **पठनाय** विद्यालयं गच्छति।
3 सज्जनाः **परोपकाराय** जीवन्ति।
4 प्रधानाचार्यः **छात्रेभ्यः** पारितोषिकं यच्छति।
5 **शिक्षकाय** नमः।

Edit with WPS Office